संस्कृत-भवितव्यम्

● निरन्तरं पञ्चषष्टिवर्षाणि प्रकाश्यमानं विश्वस्य एकमेव संस्कृतसाप्ताहिकम् ●

संस्कृत-भाषा-प्रचारि-सभायाः मुखपत्रम्

अङ्क-मूल्यम् रु. ५/- वा. शु. : रु. २५०/-	PRINTED MATTER	वृत्तपत्र-पञ्जीयन-संख्या RN 11454/57
Core Banking Facility : **Name :** Sanskrit Bhasha Pracharini Sabha **A/c No. :** 30362855441 **IFSC/CIF Code :** SBIN0004872	डाकप्रेषण पञ्जीयनसंख्या NGP-27 Postage Licence No. 9 संपादिका: डॉ. लीना रस्तोगी	सहसंपादिकाद्वयम्: डॉ. वीणा गानु, डॉ. शारदा गाडगे

संस्थापक-संपादक:
स्व. डॉ. श्री. भा. वर्णेकर

वर्षम् ६५, अङ्कः ४१

शनि. दि. २६ डिसेम्बर २०१५, मार्गशीर्ष कृ. १ शके १९३७, युगाब्द ५११७

ISBN 978-0-00-000978-4 18900

13 Digit ISBN : 978-1-890041-04-5
Barcode ISBN : 978-0-00-000978-4:18900

प्रबन्धिका
डॉ. प्रज्ञा देशपाण्डे
prabandhika.sanskbhavitavyam@gmail.com

प्रकाशक:
डॉ. चन्द्रगुप्त वर्णेकर
०९३७०८०३९१३
cswarnekar@gmail.com

संस्कृत-भवनम्,
२, पश्चिम: उच्च-न्यायालय-मार्ग:, नागपुरम् - ४४० ००१.

www.sanskritbps.org

वार्ता:

मा. गो. वैद्य

डॉ. बलदेवानन्दसागरः

डॉ. लीना रस्तोगी

न. र. पत्तरकिने

वृत्तमाध्यमक्षेत्रे दिग्गजा:

■ **पत्रकारिताविषये कार्यशाला** - दृक्श्राव्य-मुद्रित-माध्यमैः पत्रकारवृत्तिं स्वीकर्तुं समुत्सुकानां सर्वेषां, विशेषतः छात्राणां कृते एकदिवसीया कार्यशाला सुप्रसिद्धानां संस्कृत-वार्ताप्रवाचकानां, भारतीय-संस्कृतपत्रकार-सङ्घस्य महासचिवानां **डॉ. बलदेवानन्द सागराणां** मार्गदर्शने शनिवासरे ९ जानेवारी २०१६ दिनाङ्के संस्कृतभवने भविता। ज्येष्ठ-पत्रकार-**श्री. मा. गो. उपाख्य बाबूरावजैद्यवर्याणां** ''लोकतन्त्र में चतुर्थ स्तम्भ पत्रकारिता की भूमिका'' एतस्मिन् विषये प्रमुखं भाषणं तथा च **श्री. नन्दकिशोर पत्तरकिने**वर्यस्य लेखनशैलीविषये मार्गदर्शनं भविष्यति। सम्पर्कः - सौ. अनुश्री जोशी (९४०४५८२१०७)

■ **त्रिवेणी-समरसता-पर्व** - ऐषमः मार्गशीर्ष-पूर्णिमा-तिथौ श्रीदत्तजयन्ती, ख्रिसमस्-महोत्सवः, ईदेमिलादोत्सवश्चेति उत्सवत्रयमेकस्मिन्नेव दिने २५ डिसेम्बरदिनाङ्के सोत्साहमनुष्ठीयते। सामाजिकसमरसतायाः कृते अभूतपूर्वः अवसरोऽयं खलु!

(कृपया सम्पादकीयं द्रष्टव्यम्।)

■ **भारतीय-संस्कृत-पत्रकारसङ्घ**स्य अचिरादेव नवदिल्यां सुसम्पन्ने पञ्चमे वार्षिकाधिवेशने निम्नलिखिता कार्यकारिणी समुद्घोषिता वर्तते।

संरक्षकपदे शारदापत्रिकायाः सम्पादकः पण्डितवसन्त-अनन्तगाडगिळमहोदयः, अध्यक्षपदे डॉ. रमाकान्त-शुक्लः, महासचिवपदे डॉ. बलदेवानन्दसागरः, सचिवपदे, डॉ. ऋषिराज पाठकः, संयुक्त-सचिवपदे जीवनशर्म-गवीश-द्विवेदिनौ, कोषाध्यक्षपदे डॉ. चन्द्रभूषणझा तथा च उपाध्यक्षपदे देवर्षि कलानाथ-शास्त्री, डॉ. रवीन्द्रनागरः, प्रो. रमेशकुमारपाण्डेयः, डॉ. चन्द्रगुप्तवर्णेकरः, डॉ. प्रफुल्ल-पुरोहितः, डॉ. सम्पदानन्दमिश्रः, डॉ. बलदेवशर्मा, प्रो. हिमांशुपोटा च सर्वसम्मत्या चिताः। एतदतिरिच्य साधारण-सदस्येषु पञ्चसदस्याः श्री. वेदप्रकाशशर्मा, डॉ. वीणागानुः, श्रीमती के श्यामला, डॉ. बृहस्पतिमिश्रः, डॉ. अभिनवशुक्लश्च निर्विरोधं चिताः सन्ति।

■ **प्रधानमन्त्रिण: रशियाप्रवास:** महति कोलाहले यदा संसदः शीतसत्रं सम्पूर्णतां गतं तदा विकासकार्याय परस्परसहकार्यं साधयितुं रशियादेशं प्रयातः प्रधानमन्त्री नरेन्द्रमोदी।

■ **दिल्ली-संस्कृत-अकादमी** - 'संस्कृतचन्द्रिका' इति बालमासपत्रिकां प्रकाशयति। अस्याः पत्रिकायाः कृते समुचितं बालसाहित्यं प्रेषणीयम् इति समुद्घोषयति इयम् अकादमी।

तावदेव प्रतिष्ठा स्याद् भारतस्य महीतले।
ज्ञानामृतमयी यावत् सेव्यते सुरभारती॥

सम्पादकीयम्

समन्वय-योगः !

ऐषमः सप्ताहोऽयं कामपि अनितरसाधारणीं विशेषतां भजते। अस्मिन् सप्ताहे मार्गशीर्ष-शुक्ल-एकादश्यां गीता-जयन्त्युत्सवः पूर्णिमायां च दत्तजन्मोत्सवः विद्येते अपि च ईद-ए-मिलाद इति प्रेषितस्य मोहम्मद-पैगम्बरस्य जन्मदिनम्। ख्रिसमस इति येशुख्रिस्तस्य जन्मदिनम्। एषः दुर्लभः योगः त्रिवेणीसङ्गमः इव खलु।

साम्प्रतिके संवेदनशीले वातावरणे नूनं कश्चन सन्देशं पाठयति एषः संयोग इति मे मतिः। अकारणसंवेदनपरायणेषु जनेषु सकारणसंवेदनशीलराजनीतिविद्भिः यः बुद्धिभेदः जनयते तस्य निराकरणार्थमेव नियतिकृतः प्रयोगः ननु। महत्या संख्यया जनाः अस्मिन् सप्ताहे हर्षोल्लासेन उत्सवान् आमन्यन्ते। स्वीयेषु उपासनास्थलेषु मन्दिरेषु गृहेषु च उपविश्य उपोष्य वा धर्मग्रन्थान् पठन्ति, अन्तर्मुखाश्च भवन्ति। एतादृशाः स्व(पुरुष)ार्थपरायणाः जनाः कथं अन्यार्थिनः भवेयुः ? तेन न कोऽपि धर्मः, पन्थाः, उपासनामार्गः वा अन्यान् असहमानः भवितुमर्हति। न भवति। तथापि धर्माचरणमिषेण केचन धूर्ताः सामान्येषु जनेषु कलहमुत्पादयन्ति। जनाः अपि अज्ञाः, गतानुगतिकाः। ताः भावनाः अनुसृत्य स्वहानिं, मित्रघातं राष्ट्रद्रोहं च कर्तुं प्रवर्तन्ते। अबुद्ध्वा कृतमेतादृशमाचरणं वैमनस्याय भवति। ततः प्रारब्धया यादवीयचक्रवात्या समाजः विकीर्णो जायते। 'सं वो मनांसि जानताम्।' इति वैदिकी सामूहिकी प्रार्थना अङ्गे एव जीर्णा भवति।

वस्तुतः यदि स्वमार्गे दृढं विश्वसिमः तर्हि धूर्तानां कपटगुहायां नैव प्रविशामः। अपि तु परधर्मादरः वृद्धिं यायात्। यस्याः जन्मोत्सवः अस्माभिः उत्साहेन आचरितः सा त्रिमूर्तिरूपा, त्रिगुणात्मिका गुरु-दत्तदेवता वस्तुतः समन्वयस्य प्रतीकरूपं भजते। यथा अद्वैतवादिभिः तथैव योगिभिरपि सा आराध्यते। यथा शैवाः तथा वैष्णवाः अपि तां भजन्ते। यथा कर्ममार्गिणः तथैव नाथपन्थीयाः, महानुभावीयाः अपि तां पूजयन्ति। यथा हिन्दुजनाः तथैव अन्येऽपि तस्याः भक्ताः। दत्त एव ब्रह्म इति प. प. श्रीमद्-वासुदेवानन्द-सरस्वतीमहाराजेन दृढं प्रतिपादितम्। तद् ब्रह्म यद् जनयितृ, पालयितृ, संहर्तृ च। तदेव ब्रह्म उत्पत्ति-स्थिति-लयानाम् अधिष्ठातृ-दैवतानां ऐक्यत्वेन दत्तरूपेण उपास्यते।

अपरञ्च स्मर्तृगामी दत्तः वर्णाश्रमधर्माणां पालयिता सन्नपि वर्णाश्रमधर्मातीतो वर्तते। तत् तस्य स्वरूपं वर्णाश्रमधर्माणां पालनेनैव प्राप्तुं शक्यते। अस्यार्थः अस्माभिः चिन्तनीयः। धर्मः नाम कर्तव्यम्। अस्माकं जीवनस्य धर्मः नाम कर्तव्यमस्माभिः करणीयम् एव। कर्तव्यपालनेन अनुशासनम् अधितिष्ठति जीवने। तेनैव विकाराः मन्दायन्ते, कर्तृभावः क्षीयते च। तदा ज्ञानमार्गः सुकरः भवति। राष्ट्रजीवनेऽपि एवम् अनुशासनबद्धाः जनाः निष्कामकर्म कुर्वन्तः देशस्य विकासं हितं च साधयितुं शक्नुवन्ति। पारलौकिकोन्नत्या सार्धम् ऐहिकोन्नतिः अपि वाञ्छनीया एव। साधनीया एव।

'ईद-ए-मिलाद' इति उत्सवोऽपि एवमेव स्मारयति अस्मान्। इस्लाम शब्दस्य अर्थो विद्यते करुणा इति। सः अर्थः चिन्तनीयः पालनीयः च। आतङ्कवादः हिंसा वा नैव कदापि इस्लाम-सम्मतौ स्तः।

यीशुख्रिस्तः उपादिष्टवान् - प्रतिवेशिनि स्निह्यातु इति। अपराधिनः अपि क्षन्तव्याः इति।

एवं च, एतैः प्रसृतेभ्यः तत्त्वेभ्यः, कर्तव्यपालनम्, करुणा प्रेम क्षमा इति त्रिगुणान् अङ्गीकर्तुं प्रयतितव्यं मनुष्येण। तदा तस्य, तस्य समाजस्य, तस्य राष्ट्रस्य च उन्नतिः भवितुमर्हति इति सन्देशं प्रसारयति सप्ताहोऽयम्। तं समन्वयं साधयितुं प्रवर्तेरन् जनाः इतः आरभ्य इति आशास्महे।

इति शम्।

● डॉ. वीणा गानु

महाशब्दरञ्जनी उत्तरम्

१ मा	ता	★	★	२ प	३ अ	★	४ धी	★	५ उ	प	६ वा	७ स	★	८ अ
★	★	९ अ	१० म	रा	व	११ ती	★	१२ कः	★	★	१३ स	प्त	र्ष	यः
१४ प	१५ रा	ज	यः	★	१६ नी	र	१७ ज	★	१८ भ	ग	व	न्	★	★
१९ रा	मा	★	★	२० गाः	★	★	ल	★	ङ्गी	★	द	★	२१ य	२२ या
२३ श	य	नं	★	★	२४ क	ल्प	त	रूः	★	२५ स	त्ता	★	२६ या	हि
२७ र	णं	★	२८ क	म	ला	★	र	★	२९ अ	मी	★	३० म	तिः	★
★	★	३१ त	र्कः	★	३२ वि	ह	ङ्गः	★	३३ भ	रः	★	म	★	३४ म
३५ य	मी	★	★	३६ प्रा	ज्ञः	★	★	३७ मः	य	★	३८ प	ता	३९ कि	नी
मः	★	४० दि	४१ व	सः	★	४२ सि	४३ नी	★	४४ दा	४५ न	व	★	४६ र	षा
★	४७ म	ग	धः	★	★	★	४८ वा	४९ म	न	य	न	म्	★	पू
५० का	द	म्ब	★	५१ अ	५२ न	५३ व	र	त	म्	★	सु	★	५४ की	र्तिः
त्या	★	रः	★	★	५५ व	सु	धा	म्	★	५६ र	तः	★	रः	★
५७ य	ज्ञः	★	★	५८ स	दा	★	नी	★	५९ वि	★	★	६० प	★	६१ ज्ञा
नी	★	६२ सु	६३ र	भा	र	ती	★	६४ वि	प्ल	व	६५ का	री	★	ने
★	६६ श	रा	वः	★	कः	★	६७ प्र	भा	वः	★	६८ ल	क्षा	धी	शः

'ख्रिसमस्'-निमित्तेन लेखः

भारतम् इति सर्वधर्मसमावेशकं राष्ट्रम्। सर्वे धर्माः भारतस्य संस्कृतिरूपपुष्पस्य अन्यतमानि दलानि। किं च जगति यदा कदापि धर्मविषयकाः कलहाः समजायन्त, तदा भारतीयसंस्कृतिरेव दीपस्तम्भवत् मार्गदर्शिका अभूत्। संसारेऽस्मिन् स्वतत्त्वचिन्तनेन सदाचरणेन च यथार्थतया 'भा'सि रतं भारतराष्ट्रम्। सर्वविधधर्माणाम् आचार-विचाराः, उत्सवाः, वेशभूषाः, साहित्यम् इत्येतानि भारतीयसंस्कृतिं द्योतयन्ति। तत्र उत्सवद्वारा आनन्दस्य प्रकटीकरणं, परस्परेषु स्नेहभावस्य वर्धनम् इति महत्त्वपूर्णम् अङ्गम्।

भारते प्रचलितानां उत्सवानां वैविध्ये 'ख्रिसमस्' इति ख्रिस्तबान्धवानां प्रमुखोत्सवः यः प्रभु-येशुख्रिस्तस्य जन्म-दिवसरूपेण सर्वत्र उत्साहेन सम्पाद्यते। पुरातनकालादेव जनाः अस्योत्सवस्य परम्पराः आचाराः च धार्मिकाः तथापि सर्वसमावेशिकाः इति मन्यन्ते। प्रभु-येशुः इति धर्मस्यास्य प्रमुखोपदेशकः यस्य उपदेशेनैव धर्मस्यैतस्य मूलं निर्मितं निर्मीयते वा। संसारोऽयं यदा अधर्मेणाभिभूतः, तदैव धर्मसंस्थापनापनार्थं महीतले ईश्वरदूतस्यागमनमिति तत्त्वं 'बायबल्' इत्यस्मिन् ख्रिस्तबान्धवानां ग्रन्थेऽपि वर्णितं दृश्यते। यत्र ईश्वरेण संसारं निर्माय षष्ठ-दिने मनुष्यः निर्मितः इति वर्णितं वर्तते। 'आदम्' तथा 'एवा' इत्येतयोः प्राणं प्रस्थाप्य संसारस्योपभोगार्थं तौ आदिष्टौ। अपि च एडन्-उद्याने विद्यमानं ज्ञानवृक्षस्य फलं न भोक्तव्यम् इति आदिष्टौ। तथापि आज्ञाम् उल्लङ्घ्य ताभ्यां फलम् आस्वादितम्। तयोः पापाचरणेन ईश्वरः तत्र समुपस्थितः। तयोः पापमेव 'आदिपाप'-रूपेण परिगणय्य दण्डरूपेण पृथिव्यां भ्रमणं, कष्टपूर्णं जीवनं यापयितुं ईश्वरेण तौ शप्तौ। पापमुक्त्यर्थं ईश्वरेण स्वयं पुत्रप्रेषणम् आश्वासितम्। स एव ईश्वरस्य पुत्रः प्रभु-येशुः इति। आदम् एवा इत्येतयोः आदिपापस्य छाया अद्ययावत् मनुष्येषु वर्तते। तां विनष्टुमेव प्रभुः येशुः अवतरति इति ख्रिस्तजनानां मतम्।

यद्यपि २५ डिसेम्बर इति येशोः जन्मदिनमिति मन्यते, तथापि रशिया, सर्बिया इत्यत्र 'जूलियन' दिनदर्शिकानुसारं ७ जानेवारी इति ख्रिसमस् मन्यते। उत्सवात् पूर्वं बहवः ख्रिस्तजनाः 'अनशनम्' (Advent) आचरन्ति तथा आत्मानम्' उत्सवस्य आनन्दोपभोगार्थं सज्जीकुर्वन्ति। तद् विशिष्टम् अनशनम् नाम विशेषान्नस्यैव सेवनमिति। परम्परानुगुणं प्रदेशानुगुणं च तैः तदन्नं उपभुज्यते।

घण्टाः अथवा प्रार्थनागृहेषु घण्टानादः ख्रिसमस् उत्सवेन पारम्पारिकतया बद्धः। कॅथलिक् प्रार्थनागृहेषु सूर्यास्तादूर्ध्वं ख्रिसमस्दिनस्य आरम्भः भूत्वा तदनु प्रचाल्यमानाः आचाराः ख्रिसमस्पर्वणः प्रारम्भिकाचाराः इति गण्यन्ते। एवं घण्टानादः इति विशेषाचारस्य प्रतीकम्।

सिक्थवर्तिकाः तासां प्रज्वालनं वा इत्यपि उत्सवस्य अभिन्नम् अङ्गम्। सिक्थवर्तिकानां प्रज्वालनार्थं मतवैविध्यं दृश्यते। एकत्र मन्यते यद् सिक्थवर्तिकानां प्रज्वालनमिति वसन्तागमनं सूचयति। अन्यत्र बेथलहम्नगरस्य तारकायाः प्रतिनिधित्वं कुर्वन्ति। अपि च विद्युतः संशोधनात् प्राक् देवदारोः वृक्षस्य प्रसाधनार्थं सिक्थवर्तिकाः उपयुज्यन्ते स्म।

गीतगानम् (Carol Singing) इत्यपि ख्रिस्तोत्सवस्य महत्त्वपूर्णः घटकः। वस्तुतः उरीश्र नाम नर्तनम् अथवा स्तुतिगीतम्, आनन्दगीतं वा। गीतान्येतानि सर्वेषु ऋतुषु लिख्यन्ते, गीयन्ते च। किन्तु ख्रिस्तोत्सवस्य निमित्तेन विशेषतया गातुम् आनन्दं प्रकटयितुं च परम्परा विद्यते।

ख्रिस्तोत्सवे शुभेच्छापत्रप्रदानस्य परम्परा १८४३ तमे वर्षे इंग्लंडदेशे आरब्धा। हेन्री कोल (Henry Cole) इत्यनेन स्वमित्रेण सह ख्रिसमस्-निमित्तेन प्रप्रथमं शुभेच्छापत्रम् आलिखितं यत्र त्रिषु विभागेषु दरिद्र-जनानां साहाय्यं कृतवन्तः, तदनु ख्रिस्तोत्सवं सम्पाद्यमानाः जनाः दर्शिताः आसन्। इयं परम्परा सर्वत्र प्रसृता या अद्यापि प्रचलति।

एवं प्रकारेण प्रचलितयुगे अयमुत्सवः १२ दिनानि यावत् सम्पाद्यते। तानि दिनानि २४ डिसेम्बरतः प्रारभ्य ५ जानेवारी पर्यन्तं प्रचलन्ति। सान्ता-क्लॉज इति ख्रिस्तोत्सवस्य प्रमुखाकर्षणं बालानां कृते। अयं रक्तवेशधारी, देवदूतः पृथ्वी-तलमागत्य बालकानां कृते उपायनानि प्रयच्छति इति मन्यते।

ख्रिसमस्-वृक्षः इति वस्तुतः वनस्पतीनां, वृक्षाणां समृद्धेः प्रतीकम्। ख्रिस्तोत्सवात् पूर्वम् अनशनकाले ये वृक्षाः, वनस्पतयः वा चिरकालं हरितान्येव तिष्ठन्ति स्म, ते विशेषरूपेण जनैः मन्यन्ते स्म। अतः पाईन, स्प्रूस, देवदारुः, फर् एतादृशान् सदाहरित-वृक्षान् प्रसाधयितुं पुरातनी परम्परा वर्तते। तद्द्वारा अनिष्टशक्तिभ्यः, अनारोग्यात्, विकृतेः च रक्षणं भवति इति मन्यते।

एवं प्रकारेण यद्यपि ख्रिस्तोत्सवः एकः तथापि तस्य बहुविधानि अङ्गानि जनानां मनःसु आनन्दं सञ्चारयन्ति। पृथिवीं प्रति ईश्वरस्य आगमनम् इति कल्याणप्रदमेव। धर्मः कोऽपि वा भवतु, अधर्मं विनाश्य धर्मस्थापनमित्येव तेषां मूलम्। अतः नानाविधरूपिणी भारतीयसंस्कृतिः चिरं विलसेत् इत्यत्र नास्ति संशयावसरः।

❖ ❖ ❖

'संयोगी' शिबिरे सर्वेषां हार्दं स्वागतम्!

ट्यूशनगामिनश्छात्रान् प्रति ...

(कजरीसदृशी रचना)

अहो त्रायतां प्रबुद्धगण! त्रायताम्!
छात्रजातिरन्धतां गता!
दारुणा विपत्तिरागता! ॥ध्रु॥

प्रभातसमये ''गणित''-ट्यूशनम्
तत्पश्चात् किम्? ननु ''रसायनम्''
गुरुगृहाद्गुरुगृहं भ्रमन्ति ते सदा
चक्रचरणयोनितां गताः
दारुणा विपत्तिरागता ॥१॥

ब्राह्ममुहूर्तादाशयनं ते
चक्रनेमिवद् विभ्राम्यन्ते
चक्रमीदृशं चलत्यहो सुनिश्चितं
''विषय''व्यापृता हि ते हताः
दारुणा विपत्तिरागता ॥२॥

न स्वाध्यायो, न चापि मननम्
केवलमेकं रटनं, रटनम्!!
अहो मानुषं शरीरमाश्रिताश्च ते
'रटनयन्त्र' मात्र-परिणताः।
दारुणा विपत्तिरागता ॥३॥

न सुप्रभातस्य चानुभूतिः
न चापि सन्ध्यावर्णे प्रीतिः
शैशवेऽपि वीतरागतां तपस्विनो
गुरुजनैर्बलात्समीरिताः।
दारुणा विपत्तिरागता ॥४॥

● डॉ. लीना रस्तोगी

दर्पणोऽहं मृषा नैव भाषे!

आन्तरज्योतिषैव प्रकाशे
दर्पणोऽहं मृषा नैव भाषे॥

सत्यमास्ते मदीये निसर्गे
नावसक्तो गुणे नापि वर्गे।
नापि सन्धौ रतिर्नो समासे
दर्पणोऽहं मृषा नैव भाषे॥१॥

यो यथा, तं तथा दर्शयेऽहम्
रावणश्चापि नो मर्षयेऽहम्।
नैरपेक्ष्यं विलापेऽथ हासे
दर्पणोऽहं मृषा नैव भाषे॥२॥

पद्मिनीरूपसिन्धौ प्रलीनः
मामलं वेद सोऽलाबदीनः[१]।
योऽभवन्नामशेषो हुताशे
दर्पणोऽहं मृषा नैव भाषे॥३॥

सृष्टिसत्यस्य दृष्टान्तभूतः
सम्मतोऽहं चिदाभासपूतः।
ब्रह्मरूपोऽस्मि पिण्डावकाशे
दर्पणोऽहं मृषा नैव भाषे॥४॥

नो तमोभिस्समं मत्प्रबन्धः
नाऽपि धृतराष्ट्रपक्षेऽनुबन्धः।
तत्त्वभूतोऽस्म्यहं चिद्विलासे
दर्पणोऽहं मृषा नैव भाषे॥५॥

डॉ. अभिराज राजेन्द्र मिश्रः
शिमला (हि.प्र.)

१. अलाउद्दीन खिलजीति दिल्लीसुरत्राणः।

जीवनस्य बोधः!

अहं मम मातरम् अपृच्छम्, ''जीवनं सफलं कथं भवेत्?''

माता प्रत्यवदत्, ''मम कोष्ठः एव मह्यं सर्वाणि उत्तराणि यच्छति। ...''

छदिः वदति, ''ध्येयम् उच्चं भवेत्।''

व्यजनम् कथयति, ''शीतलः भव।''

घटी निगदति, ''समयस्य मूल्यं जानीहि।''

दिनदर्शिका ब्रवीति, ''कालानुसारेण अधिकाधिकम् आधुनिकं ज्ञानं गृहाण।''

धनस्यूतः उपादिशति, ''भविष्यार्थम् इदानीमेव धनं रक्ष।''

आदर्शः आदिशति, ''नित्यं स्वनिरीक्षणम् कुरु।''

भित्तिः ब्रूते, ''अन्यस्य भारं वोढुं तान् साहाय्यं कुरु।''

वातायनम् आह, ''दीर्घदृष्टिः आवश्यकी।''

भूमिः भाषते, ''भूम्यामेव तिष्ठ।'' (धन-यौवन-ज्ञान-सौन्दर्य-सामर्थ्य-आदीनां मदेन गर्विष्ठः मा भव।)

सोपानः भणति, ''निरीक्ष्य एव पदम् अग्रे स्थापय।''

● **उज्ज्वला पवार**, मुम्बई

संस्कृत-भाषा-प्रचारिण्याः सभायाः इदं साप्ताहिकं राष्ट्रीयसंस्कृतसंस्थान, नई दिल्ली द्वारा प्रदत्तेन आंशिकार्थ सहाय्येन डॉ. चन्द्रगुप्त वर्णेकरः इत्यनेन सभायाः सचिवेन कृष्णचंद्र एजन्सीज, नागपुरम् इत्यत्र मुद्रापयित्वा संस्कृत-भवने २, पश्चिम-उच्च-न्यायालय-मार्ग, नागपुरे प्रकाशतां नीतम्।